# ॥ परमेश्वर स्तुति स्तोत्रम् ॥

॥ श्री हरिः ॥

त्वमेकः शुद्धोऽसि त्वयि निगमबाह्या मलमयं प्रपञ्चं पश्यन्ति भ्रमपरवशाः पापनिरताः ।
बहिस्तेभ्यः कृत्वा स्वपदशरणं मानय विभो गजेन्द्रे दृष्टं ते शरणद वदान्यं स्वपददम् ॥ १ ॥

न सृष्टेस्ते हानिर्यदि हि कृपयातोऽवसि च मां त्वयानेके गुप्ता व्यसनमिति तेऽस्ति श्रुतिपथे ।
अतो मामुद्धर्तुं घटय मयि दृष्टिं सुविमलां न रिक्तां मे याच्ञां स्वजनरत कर्तुं भव हरे ॥ २ ॥

कदाहं भो स्वामिन्नियतमनसा त्वां हृदि भजन्नभद्रे संसारे ह्यनवरतदुःखेऽतिविरसः ।
लभेयं तां शान्तिं परममुनिभिर्या ह्यधिगता दयां कृत्वा मे त्वं वितर परशान्तिं भवहर ॥ ३ ॥

विधाता चेद्विश्वं सृजति सृजतां मे शुभकृतिं विधुश्चेत्पाता मावतु जनिमृतेर्दुःखजलधेः ।
हरः संहर्ता संहरतु मम शोकं सजनकं यथाहं मुक्तः स्यां किमपि तु तथा ते विदधताम् ॥ ४ ॥

अहं ब्रह्मानन्दस्त्वमपि च तदाख्यः सुविदित स्ततोऽहं भिन्नो नो कथमपि भवत्तः श्रुतिदृशा ।
तथा चेदानीं त्वं त्वयि मम विभेदस्य जननीं स्वमायां संवार्य प्रभव मम भेदं निरसितुम् ॥ ५ ॥

कदाहं हे स्वामिञ्जनिमृतिमयं दुःखनिबिडं भवं हित्वा सत्येऽनवरतसुखे स्वात्मवपुषि ।
रमे तस्मिन्नित्यं निखिलमुनयो ब्रह्मरसिका रमन्ते यस्मिंस्ते कृतसकलकृत्या यतिवरा ॥ ६ ॥

पठन्त्येके शास्त्रं निगममपरे तत्परतया यजन्त्यन्ये त्वां वै ददति च पदार्थांस्तव हितान् ।
अहं तु स्वामिंस्ते शरणमगमं संसृतिभयाद्यथा ते प्रीतिः स्याद्धितकर तथा त्वं कुरु विभो ॥ ७ ॥

अहं ज्योतिर्नित्यो गगनमिव तृप्तः सुखमयः श्रुतौ सिद्धोऽद्वैतः कथमपि न भिन्नोऽस्मि विधुतः ।
इति ज्ञाते तत्त्वे भवति च परः संसृतिलया दतस्तत्त्वज्ञानं मयि सुघटयेस्त्वं हि कृपया ॥ ८ ॥

अनादौ संसारे जनिमृतिमये दुःखितमना मुमुक्षुः सन्कश्चिद्व्रजति हि गुरुं ज्ञानपरमम् ।
ततो ज्ञात्वा यं वै तुदति न पुनः क्लेशनिवहै भजेऽहं तं देवं भवति च परो यस्य भजनात् ॥ ९ ॥

विवेको वैराग्यो न च शमदमाद्याः षडपरे मुमुक्षा मे नास्ति प्रभवति कथं ज्ञानममलम् ।
अतः संसाराब्धेस्तरणसरणिं मामुपदिशन् स्वबुद्धिं श्रौतीं मे वितर भगवंस्त्वं हि कृपया ॥ १० ॥

Vaidik Jeevn™
Sanatan Online Store
www.vaidikjeevn.com



7706011555
www.vaidikjeevn.com

# ॥ परमेश्वर स्तुति स्तोत्रम् ॥

कदाहं भो स्वामिन्निगममतिवेद्यं शिवमयं चिदानन्दं नित्यं श्रुतिहृतपरिच्छेदनिवहम् ।
त्वमर्थाभिन्नं त्वामभिरम इहात्मन्यविरतं मनीषामेवं मे सफलय वदान्य स्वकृपया ॥ ११ ॥

यदर्थं सर्वं वै प्रियमसुधनादि प्रभवति स्वयं नान्यार्थो हि प्रिय इति च वेदे प्रविदितम् ।
स आत्मा सर्वेषां जनिमृतिमतां वेदगदित स्ततोऽहं तं वेद्यं सततममलं यामि शरणम् ॥ १२ ॥

मया त्यक्तं सर्वं कथमपि भवेत्स्वात्मनि मतिस्त्वदीया माया मां प्रति तु विपरीतं कृतवती ।
ततोऽहं किं कुर्यां न हि मम मतिः क्वापि चरति दयां कृत्वा नाथ स्वपदशरणं देहि शिवदम् ॥ १३ ॥

नगा दैत्याः कीशा भवजलधिपारं हि गमितास्त्वया चान्ये स्वामिन्किमिति समयेऽस्मिञ्छयितवान् ।
न हेलां त्वं कुर्यास्त्वयि निहितसर्वे मयि विभो न हि त्वाहं हित्वा कमपि शरणं चान्यमगमम् ॥ १४ ॥

अनन्ताद्या विज्ञा न गुणजलधेस्तेऽन्तमगमन्नतः न पारं यायात्तव गुणगणानां कथमयम् ।
गुणवद्धि त्वां जनिमृतिहरं याति परमां गतिं योगिप्राप्यामिति मनसि बुद्ध्वाहमनवम् ॥ १५ ॥

॥ इति श्रीमन्मौक्तिकरामोदासीनशिष्यब्रह्मानन्दविरचितं परमेश्वरस्तुतिसारस्तोत्रं सम्पूर्णम् ॥